छोवरुणालयम्। शूलं निवेश्य लवणे वरं तस्मै न्यवेदयत्। स प्रभावेण शूलस्य दौरात्म्येनात्मनस्तथा। सन्तापयति लोकांस्त्रीन्विशेषेण च तापसान्"। सचासुरः शत्रुघ्नेन हतः तत्कथा रामा०उत्त०। ६२अ०। स (शत्रुघ्नः) कुम्भी-च महावाणं लवणस्य महोरसि। उरस्तस्य विदार्य्याशु प्रविवेश रसातलम्"।

कुम्भीनसि पु० बलिदानवे "शम्बरस्य च या माया या माया नमुचेरपि। बलेः कुम्भीनसेश्चैव सर्व्वास्ता-योषितोविदुः" भा० आ० २२३८अ०

कुम्भीपाक पु० नरकभेदे कारणसहितं तत्स्वरूपमुक्तं भाग० ५ २६ १६ "महारौरवः कुम्भीपाकः कालसूत्र मित्यादिना नरकान् विभज्य "यस्त्विह वा उग्रः पशून् पक्षिणो वा प्राणे उपरन्धयति तमपकरुणं पुरुषादैरपि गर्हितममुत्र यमानुचराः कुम्भीपाके तप्त-तैले उपरन्धयन्ति" "करम्भवालुकातापान् कुम्भीपाकांश्च दारुणान्" मनुः। "स्तुतिवादमिषं मत्वा कुम्भीपाके महीयते" प्रा०त०।

कुम्भीर पुंस्त्री० कुम्भिनं हस्तिनमपीरयति ईर—अण्। जलजन्तुभेदे नक्रे अमरः स्त्रियां ङीष्। "संवत्सरन्तु कुम्भीरस्ततोजायेत मानवः" भा०आनु० १११अ०। कर्म्मविपाक-शब्दे विवृतिः। [ (कुमीरे पोका) कीटभेदे हारा०।

कुम्भीरमक्षिका स्त्री कुम्भीरोपपदा मक्षिका शाक० त०।

कुम्भीरासन न० "अथ वक्ष्ये महादेव! कुम्भीरासनमुत्तमम्। पादोपरि पदं दत्त्वा शीर्षोपरि करद्वयम्। तिष्ठे-द्दण्डाकृतिर्भूमौ कुम्भीरासनमुच्यते" रुद्रया० उक्ते आसनभेदे

कुम्भील पुंस्त्री कुम्भीर+रस्य लः। कुम्भीरे अमरमाला स्त्रियां ङीष्। संज्ञायां क। चौरभेदे कुम्भिलशब्दार्थे

कुम्भीबीज न० ६त०। जयपालवृक्षबीजे राजनि०।

कुम्भोदर पु० शिवपारिषद्भेदे। "कुम्भोदरं नाम निकुम्भमित्रम्" रघुः। कुम्भतुल्यमुदरमस्य। तथोदरे त्रि०स्त्रियां ङीष्

कुयव पु० कुत्सितेन यौति यु—अच्।" असुरभेदे "कुत्साय शुष्णं नि बर्हीः प्रपित्वे अह्नः कुयवं सहस्रा" ऋ०४।१६।१२। "कुयवं कुयवनामासुरम्" भा० "शुष्णं पिप्रुं कुयवं वृत्रमिन्द्र। यदावधीः" ऋ० १,१०३,८। कुगतिस०। २ कुत्सिते धान्ये "क्षीरेण स्नातः कुयवस्य योषे" ऋ० १। १०४।३। "पूर्व्वतरञ्च मे कुयवञ्च मे" "यजु० १८। ११ "कुयवं कुधान्यम्" वेददी प०

कुयवाच् पु० असुरभेदे "नि दुर्योणे कुयवाचम्मृधि श्रेत्" ऋ० १।१७४।७। "कुयवागित्येतन्नामानमसुरम्" भा०

कुर शब्दे तुदा०पर०अक०सेट्। कुरति अकोरीत्। चुकोर कुरटः। [राजनि०।

कुरका स्त्री कुर—क सद्रव कायति कै—क। सल्लकीवृक्षे

कुरङ्कुर पुंस्त्री कुरं शब्दं करोति कृ—अच् मुम्। सारस-पक्षिणि हेमच० स्त्रियां ङीष्

कुरङ्कुर पुंस्त्री० कुरमित्यव्यक्तं शब्दं कुरति कुर—क। सारसखगे हारा० स्त्रियां ङीष्।

कुरङ्ग पुंस्त्री० कौ रङ्गति—अच्। "कुरङ्ग ईषत्ताम्रः स्याद्ध-रिणाकृतिको महान्" इत्युक्तचिह्ने १मृगभेदे २मृगमात्रे अमरः स्त्रियां ङीष्। "कुरङ्गमातङ्गपतङ्गभृङ्ग-मीना हताः पञ्चभिरेव पञ्च। एकः प्रमादी स कथं न हन्यते यः सेवते पञ्चभिरेव पञ्च" भाग० व्या० श्रीधरः तन्मांसगुणा भावप्र० यथा "कुरङ्गो बृंहणोबल्यः शीतलः पित्तहृद्गुरुः। मधुरोवातहृत् ग्राही किञ्चित् कफकरोमतः। हरिणस्य गुणैस्तुल्याः कुरङ्गः कथितोबुधैः" २तारलोहे ३तीर्थभेदे न० "करतोयां कुरङ्गं च त्रिरात्रो पोषितोनरः। अश्वमेधमवाप्नोति विगाह्य प्रयतः शुचिः" भा० आनु० २५अ०। स्वार्थे क। कुरङ्गक तत्रार्थे

कुरङ्गनयना स्त्री कुरङ्गस्येव नयनमस्याः। सुन्दरनेत्रायां स्त्रियां "किन्त्वेका यमुना कुरङ्गनयनानेत्राम्बुभिर्वर्द्धते" उद्भटः। कुरङ्गाक्ष्यादयोप्यत्र "कुरङ्गाक्षीवृन्दं तमनु-सरति प्रेम नरलम्" कर्पूरस्तवः।

कुरङ्गनाभि पु०६त०। मृगमदे गन्धद्रव्ये राजनि०तस्य तन्नाभि-जातत्वादभेदोपचारात्तथात्वम् कस्तूरीशब्दे गुणाद्युक्तम्।

कुरङ्गम पुंस्त्री० कौ रङ्गं मिमीते मा—ड। हरिणभेदे कुरङ्गे मृगे त्रिका० स्त्रियां ङीष्। [ राजनि०

कुरङ्गिका स्त्री कौ—रङ्गोऽस्त्यस्य ठन्। मुद्गपर्ण्याम्

कुरचिल्ल पुंस्त्री० कुरे शब्दे चिल्लति चिल्ल—शैथिल्ये अच्। कर्कटे हेमच० स्त्रियां टाप्। [ जातित्वात् ङीष्

कुरट पुंस्त्री०कुर—अटन् किच्च। चर्म्मकारे त्रिका० स्त्रियां

कुरण्ट(क) पु० कुर्य्यते शब्द्यते कुर—कर्म्मणि अण्टक्। पीतझिण्टायां स्वार्थे क। तत्रार्थे अमरः।

कुरण्ड पु० कुर—अण्डक्। १शाकरुण्डवृक्षे राजनि०। २अण्डवृद्धिरोगे हेमच० तन्निदानादि माधवनिदा-नोक्तं यथा—

"क्रुद्धोऽनूर्द्ध्वगतिर्वायुः शोथशूलकरश्चरन्। मुष्कौ